# Shrichakra Varnanam

# श्रीचक्रवर्णनम्

## Document Information

Text title : Shrichakra Varnanam

File name : shrIchakravarNanam.itx

Category : devii, shivarahasya, devI

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhavAkhyaH dvitIyAMshaH | adhyAyaH 16 ||

Latest update : September 16, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

# श्रीचक्रवर्णनम्

मुनयः -
कथं देव्या तारकारे पुरं श्रीपुरनामकम् ।
कल्पितं श्रीमहेशाज्ञावशतस्तददाद्य नः ॥ १॥

स्कन्दः -
यथा देव्या निर्मितञ्च श्रीपुरं श्रृणुत द्विजाः ।
कामेशेन द्विजेनैव (शिवेनैव) सा प्रोक्ता परमेश्वरी ॥ २॥

ललिता श्रीमहादेवी सैव त्रिपुरसुन्दरी ।
मनसा चिन्तयामास पुरं तत्र मनोरमम् ॥ ३॥

मणिप्राकारशतकैर्भूधराकारगोपुरैः ।
मणिमाणिक्यखचित नवरत्नोरुकान्तिभिः ॥ ४॥

प्रफुल्लसुमनामोदिरत्नवृक्षवनावृतम् ।
कल्पवाटीपरिवृतनीपोद्यानविराजितम् ॥ ५॥

सुधासिन्धुतरङ्गौघरम्यपर्यन्तमारुतम् ।
नवरत्नागारसौधकुम्भोद्यत्कान्तिकान्तितम् ॥ ६॥

दिव्यमुक्तावलीक्लृप्तसरावलि(वल्य)विभूषितैः(विभूषितम्) ।
गोमेदपुष्परागोद्यत्प्रवालमणितोरणैः ॥ ७॥

हीरजालकसञ्छन्नकुम्भवमौलिविराजितेः ।
सौधपङ्क्तिसमुत्सेधविशालायुतशस्तदा ॥ ८॥

मणिमाणिक्यखचितनवरत्नविचित्रितैः ।
धूपितैस्तगरामोद(पार)पाटीरोशीरचन्दनैः ॥ ९॥

पुरद्वारैर्ध्वलितगवाक्षवलभीयुतैः ।
मण्टपावलिसञ्छन्नमौलिपालिततद्युतिः ॥ १०॥

मणिरोचिश्चिताादर्श कुट्टिमोद्यत्कवाटकैः ।
प्राक्पश्चादुत्तरे चैव दक्षिणे पूर्वतः क्रमात् ॥ ११॥

मणिगोपुरमौलिस्थहीरोद्यत्कलशप्रभैः ।
तिरस्कारितचन्द्रार्कैः प्राकारैर्मणिकल्पितैः ॥ १२॥

नियुतायुतगोद्भासिसमुच्छ्रायायोरुमण्डलेः ।
गोमेदपुष्परागेन्द्रनीलवैडूर्यहीरजैः ॥ १३॥

मुक्ताविद्रुमरक्ताच्छततिकान्तिविराजितैः ।
गरुडोद्गाररत्नानां मण्टपावलिशोभितैः ॥ १४॥

हीरसौधमणि(सौधैर्मणि)प्रोद्यद्वातायनगवाक्षकैः ।
देवीविहारसदनैर्मदनान्तकरस्य च ॥ १५॥

पर्यन्तरत्नमालादिछन्नमौलिविराजितैः ।
चन्द्रोपलमहासौधैश्चन्द्रासारैकनिर्झरैः ॥ १६॥

रम्यादर्शमहासौधै रत्नपुष्पविराजितैः ।
याली(पाळी)पालीचितानेकमयूरवरहंसकैः ॥ १७॥

गजसौधैर्हंससौधैस्सिह्मसौधैश्च भास्वरैः ।
तुरङ्गरथसौधेश्च शार्दूलोत्तमसौधकैः ॥ १८॥

तत्तत्प्राकारान्तराले श्रीदेव्या मनसाऽऽततैः (मनसा ततैः) ।
सुरत्नतरवस्तत्र मणि(महा)पुष्पकला(फला)वृताः ॥ १९॥

चन्दनानां च विपिनैर्नयनानन्ददायकैः ।
कल्पवृक्षोरुविपिनैर्नीपोपवनसुन्दरैः ॥ २०॥

कदम्बवनराजीभि(भी) राजद्राजीववापिकाः(कैः) ।
तत्प्रान्तमध्यसौधैश्च नवरत्नविचित्रितैः ॥ २१॥

धारासारगृहैश्चैव भ्रमद्रथगृहैस्तथा ।
मन्दारपारिजातोत्थवनवायुसुगन्धितैः ॥ २२॥

प्रत्यग्रकेतकोद्भासिचम्पकोद्दामसौरभैः ।
कुरवाशोकवकुलरसालमधुकैर्धवैः ॥ २३॥

खर्जूरपूगनारेलनागपुन्नागलोध्रकैः ।
तक्कोलाङ्कोलहिन्तालमणिरम्भाकपित्थकैः ॥ २४॥

तगरागरुकेदाररदेवदारुमधूककैः ।
चिर(चिरि)बिल्वैश्च बिल्वैश्च मधूकाम्रातकैर्धरुवैः ॥ २५॥

वल्लयस्तत्रराजन्ति(न्ते) द्राक्षे(क्षै)लापिप्पलीयुताः ।
मरीचयः कुन्दवल्यः (कुन्दमल्यो) जाजीकाः चन्द्रिकायुताः ॥ २६॥

तद्रम्यकुसुमामोदिसौम्यबन्धुरमारुतः ।
हंसा मयूराश्च पिका कोकसारसपङ्क्तयः ॥ २७॥

कापोतशारिकारावमृगाश्च चमरीगणाः ।
कुरङ्गा हस्तिनः कोलाः सञ्चरन्ति वने मुदा ॥ २८॥

नयनानन्द दं नित्यं श्रीपुरे मणिद्वीपके ।
पद्मिन्यो विविधास्तत्र रत्नसोपानमण्डिताः ॥ २९॥

प्रान्तरत्नोद्यतमहामण्टपावलिभासुराः ।
तत्र देवद्रुमापारवनराजिविराजितम् ॥ ३०॥

तत्प्राच्यां मणिसङ्क्लृप्तं दण्डिनीधाम सुन्दरं (उत्तमम्) ।
नानारत्नमणिभ्राजिसिन्धुरौघविराजितम् ॥ ३१॥

भद्रमन्द्रैर्भद्रमृगैश्चतुर्दन्तालिशोभितैः ।
कटस्रवन्मदभरैः कुम्भोद्यत्पाण्डरारुणैः ॥ ३२॥

मणिग्रैवेयघण्टादि कुथाङ्कुशविभूषितैः ।
पूर्वतो भाति शैलेन्द्रनिभैर्वारणसत्तमैः ॥ ३३॥

दक्षिणे तत्र प्राकारो नवरत्नविराजितः ।
मन्त्रिण्यास्तत्र तद्धाम नवरत्नविचित्रितम् ॥ ३४॥

उच्चैःश्रवाधिकैरश्वैर्नानावर्णैर्बलोत्कटैः ।
कल्माषिस्तित्तिरप्रख्ये रक्तकर्बुरश्वेतकैः ॥ ३५॥

नीलपीतकमाञ्जिष्ठैर्मयूरसदृशैर्हयैः ।
तत्राश्वकोटिभिर्युक्ता मन्त्रिणी सेविता तदा ॥ ३६॥

मन्त्रिण्याः (मुद्रिण्याः) पश्चिमे धाम नवरत्नविचित्रितम् ।
कुम्भोद्यन्मणिक्लृप्ताक्षचक्रजालपताककैः ॥ ३७॥

युगन्धराक्षफलकैर्घोणाकर्बुरशोभितैः ।

रथैश्च कोटिभिस्तत्र शोभिता मन्त्रिणी (मुद्रिणी) तदा ॥ ३८॥

वाराह्याश्चोत्तमं धाम रत्नावलिविभूषितम् ।
सापि प्रमुदिता नित्यं पाति तं योगिनीगणैः ॥ ३९॥

नवकोटिभिरत्युग्राः प्रासा(पाशा)सिवरपाणिभिः ।
नित्यानामन्तरा सद्म पद्मरागमणीततम् ॥ ४०॥

ततो हि परितस्तत्र ज्वालामालिनिका ततः ।
प्राकारो वह्निऽऽवीतः (वह्निनावीतः) पर्यन्तज्वालशोभितः ॥ ४१॥

अनिन्धनो दहत्येषस्वशिखालेहि(डि)ताम्बरः ।
अहोरात्रमविश्रान्तो ज्वालाव्याप्तदिगम्बरः ॥ ४२॥

मातरो वटुकाश्चैव डाकिन्यो योगिनीगणाः ।
यान्ति तत्रान्तरे देव्याः प्राकाराणां शताष्टकम् ॥ ४३॥

मार्ताण्डभैरवश्चैव तथैवानन्दभैरवः ।
प्रमोदभैरवश्चैव तथा वै मोदभैरवः ॥ ४४॥

प्राच्यां प्रतीच्यां तत्पाति (तत्पान्ति) दक्षिणे च तथोत्तरे ।
सुधाकूपाः सुधावाप्यो घृतक्षीरदधिस्रवाः ॥ ४५॥

मघुस्त्रवास्तथा नद्यः पुटके पुटके मधु ।
सुधाफलास्सदा वृक्षाश्चाम्लानानि सुमान्यपि ॥ ४६॥
(सुधाफला सदा वृक्षा अम्लानानि सुमान्यपि) ॥ ४६॥

योजनायुतगन्धीनि नेत्रानन्दकराणि च ।
द्वीपोऽयं कुमुदाकारस्सुधावार्धि तरङ्गकैः ॥ ४७॥

रञ्जितः परितो भाति मणिसारकैसुन्दरः ।
लक्षद्वयं लोसचनानां (योजनानां) मनसा शिवनिर्मितः ॥ ४८॥

तत्र चिन्तामणितते सौधे परमभास्वरे ।
कामेश्वर्या च कामेशस्तत्र नित्यमुपासते ॥ ४९॥

नानाभोगविहारेश्च नित्याभिः परिसेवितः ।
ब्रह्मविष्ण्वीश्वर सदाशिवरुद्रोरुमञ्चके ॥ ५०॥

निषण्णः परया देव्या कामेशः कामदायकः ।
कामेश्वर्या सदैवास्ते कामदानैकदीक्षितः ॥ ५१॥

कोटिकन्दर्पदर्पघ्नः कपर्दैणाङ्कशोभितः ।
सुरक्तपङ्कजाकारविग्रहस्सुन्दराकृतिः ॥ ५२॥

जपासुमनिभाधिक्यकामेश्या कान्तिव(म)त्तया ।
सेवितो विविधैर्भोगैर्नित्याभिः परिसेवितः ॥ ५३॥

(स्कन्दः -)
पाथोजातभवप्रियाकरमहापङ्केरुहाध्यासिता
पाण्योर्लोलधृताक्ष (पाणिं लोलधृताक्ष) चामरगणैस्संवीजिता सा शिवा ।
नित्याभिः परिसेविता प्रमथपेनाध्यास्त मञ्चोत्तरं
स्वस्यारक्तनखांशुनिर्गतहरिब्रह्मेशलीलायुता ॥ ५४॥

॥ इति शिवरहस्यान्तर्गते भवाख्ये श्रीचक्रवर्णनम् ॥

- ॥ श्रीशिवरहस्यम् । भवाख्यः द्वितीयांशः । अध्यायः १६ ॥

- .. shrIshivarahasyam . bhavAkhyaH dvitIyAMshaH . adhyAyaH 16 ..

Proofread by Ruma Dewan

*Shrichakra Varnanam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*